Postal Regd.No. GAMC- 1553/2019-2021
ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १४ अङ्क : १६४
जान्युआरी - २०२०

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹10

## चिन्तनम्

सतीशः गज्जर्

### मधुराः प्रहाराः

भवद्भिः सुन्दरं भूतं कुत्रापि दृष्टम् ? मया तु बहुत्र दृष्टं च श्रुतं च । कानिचन भूतानि अस्माकं गृहे अपि प्रकटीभवन्ति । वयमपि तेषाम् अभिवादनं कुर्मः यतो हि तैः दीयमाना पीडा मधुरा अस्ति । तेभ्यः अस्माकं गृहमेव रोचते इत्यपि न । मार्गेषु, वीथिषु, भित्तिषु, वार्तापत्रेषु, लोकयानेषु, चित्रशालासु, दूरदर्शनेषु, आकाशवाणीषु वा तेषां वासः भवति।

भवन्तः दूरदर्शनं नियतं पश्यन्ति । तत्र कदापि कापि सुन्दरी एवं विज्ञापनं कुर्वती दृष्टा ? – 'अहं नित्यं प्रातः व्यायामं करोमि । अहं प्राणायामं करोमि । मयि किमपि दुर्व्यसनं नास्ति । सात्त्विकम् आहारं करोमि । अतः मम मुखे अलौकिकी प्रभा दृश्यते । भवन्तः अपि तथा सौन्दर्यं स्वाधीनं कुर्वन्तु ।' केनापि उद्योगपतिना किमपि विज्ञापनम् अस्माकं हिताय न क्रियते । तच्च अमुकं वस्तु क्रेतुम् अस्मान् बलात् प्रेरयति । तत्र चेष्टमानाः कामिन्यः अस्माकं कोशं लीलया रिक्तं कुर्वन्ति । विज्ञापनस्य पाशे बालकाः स्त्रियः च स्वल्पेन यत्नेन पतन्ति ।

मुग्धाः जनाः प्रायः अनावश्यकस्य वस्तुनः विज्ञापनं विलोक्य चिन्तयन्ति यत् एतत् वस्तु मम गृहे इतोऽपि किमर्थं नास्ति ? एतत् बीजारोपणं सफलस्य विज्ञापनस्य प्रथमं सोपानम् अस्ति । एवं विज्ञापनानां मधुरैः प्रहारैः मुहुर्मुहुः हन्यमाना बुद्धिः अन्ते मुह्यति । ततः तत् वस्तु क्रेतुं कृतः निर्णयः वस्तुतः अस्मदीयः न भवति । निर्णयस्य पृष्ठे विज्ञापनस्य कूटजालं कार्यं करोति । प्रत्येकं मनुष्यः तुच्छानि वस्तूनि क्रीत्वा महापणात् निर्गच्छति तदा तस्य हस्ते लम्बितः महास्यूतः वस्तुतः अविवेकेन परिपूर्णः भवति । तस्य च पृष्ठे अनेकानि विज्ञापनानि अट्टहास्यं कुर्वन्ति । लोकः अपि तादृशं जनं 'मोडर्न' मन्यते ।

विज्ञापनानि तु आक्रमणं करिष्यन्ति एव । तत्र वयं किं कर्तुं शक्नुयाम ? आवश्यकतायाः सम्यक् निरीक्षणं परीक्षणं च कर्तुं शक्नुयाम । सन्तोषे प्रीतिं वर्धयितुं शक्नुयाम । संसारे बहूनि वस्तूनि निःशुल्कं लभ्यन्ते । तदर्थं महापणेषु अटनम् अनिवार्यं नास्ति । यथा हि जीवने रक्षिताः द्वित्राः मधुराः सम्बन्धाः मनः तर्पयन्ति । उत्तमानां साहित्यकृतीनाम् अध्ययनं जीवने महत् परिवर्तनम् आनेतुं शक्नोति । भोजनकाले अस्माकं द्वारे स्थितं बुभुक्षितं भिक्षुकं प्रति, द्रवीभूतेन हृदयेन यत्किमपि दीयते तस्य मूल्यं 'टाटा मोटर्स' ज्ञातुं न शक्नोति । एवम् असन्तुष्टं रिक्तं मानसं पूरयितुम् अनेके मार्गाः दृश्यन्ते । एतावत् ज्ञातुम् उच्चस्तरीयं शिक्षणम् आवश्यकम् अस्ति किम् ?

# प्रवृत्तं तु हिताय



हेमपुरे दुर्गा नाम धनिका वसति स्म । रघुनाथः तस्याः एकमात्रपुत्रः । पत्युः मरणस्य अनन्तरं महत्या प्रीत्या तं पोषितवती आसीत् सा।

यदा सः प्राप्तवयस्कः जातः तदा दुर्गा चिन्तितवती यत् पुत्रस्य विवाहः निर्वर्तनीयः इति । सुगन्धिपुरस्य निवासिनः नारायणस्य पुत्रीं सिन्धूरां दृष्ट्वा रघुनाथः प्रथमदर्शनेन एव तस्याम् अनुरक्तः जातः । सा सुन्दरी गुणवती च आसीत्।

किन्तु नारायणः धनिकः न आसीत्। सः वरदक्षिणादाने असमर्थः। अतः एव एतं सम्बन्धं दुर्गा न इष्टवती।

किन्तु रघुनाथः ताम् एव परिणेतुम् इच्छति। सः मातरम् अवदत् यत् यदि मया परिणीयेत तर्हि सिन्धूरा एव इति। किन्तु दुर्गा स्पष्टशब्दैः उक्तवती यत् एषः विवाहः कथमपि न सम्पत्स्यते इति। रघुनाथः मातुः विरोधं सोढुं न शक्नोति। मनस्तः सिन्धूराम् अपसारयितुम् अपि न शक्नोति सः।

अथ कदाचित् नारायणस्य बन्धुः श्रीकरः दुर्गायाः गृहम् आगतवान्। सः स्वस्य परिचयादिकम् उक्त्वा दुर्गाम् अवदत् – "आर्ये! सिन्धूरायाः पिता मम आत्मीयः। तस्य कापि सम्पत्तिः नास्ति इत्यतः खलु भवती तस्य पुत्रीं स्नुषात्वेन स्वीकर्तुं न इच्छति ? अहं भवतीं किञ्चित् रहस्यं वदामि। सिन्धूरायाः कण्ठे यस्मिन् क्षणे मङ्गलसूत्रं धार्यते तत्समनन्तरम् एव सा विंशतिलक्षरूप्यकाणां स्वामिनी भविष्यति। अतः परिणयस्य अङ्गीकारः श्रेयसे एव" इति।

एतत् श्रुत्वा दुर्गा नितरां सन्तुष्टा। 'तस्याः जातके एतादृशं विशिष्टं फलं लिखितं स्यात्' इति अचिन्तयत् सा। अतः सा श्रीकरम् उक्तवती – "भवान् सज्जनः अस्ति। भवतः वचने अहं विश्वासं करोमि। किन्तु यदि भवतः कथनस्य अनुगुणं न प्रवर्तेत तर्हि अहं स्नुषां गृहात् निष्कासयेयम् अपि। एतत् स्मर्तव्यं भवता। नारायणः विवाहस्य सन्नाहस्य आरम्भं करोतु नाम" इति।

एतदनन्तरं पक्षाभ्यन्तरे एव सिन्धूरारघुनाथयोः विवाहः सवैभवं सम्पन्नः। एतत् दृष्ट्वा जनाः दुर्गायाः मनसः उदारतां बहुधा प्रशंसितवन्तः।

नारायणः यथाशक्ति उपायनं दत्त्वा पुत्रीं पतिगृहं प्रति प्रेषितवान्। दुर्गायाः पुरतः तु विंशतिलक्षं रूप्यकाणि एव नृत्यन्ति स्म। अतः सा नारायणेन किं दत्तं, किं न दत्तम् इत्यपि न लक्षितवती।

एवमेव मासः अतीतः। तथापि सिन्धूरया धनं किमपि न प्राप्तम् एव। अतः नितरां खिन्ना दुर्गा कदाचित् श्रीकरं सुगन्धिपुरतः आनायितवती। आगतं तं सा भर्त्सनस्वरेण उक्तवती – "मङ्गलसूत्रधारणसमनन्तरम् एव मम स्नुषा विंशतिलक्षरूप्यकाणां स्वामिनी भविष्यति इति भवता उक्तम् आसीत्। किन्तु तया अद्यावधि एका वराटिका

अपि न प्राप्ता। किम् एतत्?" इति।

एतत् श्रुत्वा श्रीकरः हसन् अवदत् – "मया युक्तम् एव उक्तम् अस्ति। विवाहानन्तरं सा भवत्याः गृहस्य सदस्या जाता। तदा गृहसम्पत्तेः कश्चन भागः तया अपि प्राप्तः एव खलु? सा इदानीं निर्धनस्य नारायणस्य पुत्री न, अपि तु धनाढ्यायाः दुर्गावर्यायाः स्नुषा अस्ति। भवत्याः गृहस्य यत् ऐश्वर्यम् अस्ति तत्र तस्याः अपि भागः अस्ति एव। अतः विवाहसमनन्तरम् एव सा अपारस्य एव ऐश्वर्यस्य स्वामिनी जाता। मातृविहीनायाः तस्याः भवती एव माता" इति।

एतस्य श्रवणात् दुर्गा क्षणकालं स्तब्धा जाता। वस्तुतः श्रीकरस्य वचने असत्यं किमपि न आसीत्। 'धनाशया व्यवहृतवत्या मया योग्यः एव पाठः पठितः। इदानीं गृहम् आगतां स्नुषां यदि अहम् इतः प्रेषयेयं तर्हि मम पुत्रः अपि गृहात् निर्गच्छेत्। पुत्रः तु तस्याम् अनुरागवान्। सा गुणवती अपि। अतः हार्दभावेन तस्याः अङ्गीकारः एव वरम्। यत् प्रवृत्तं तत् हिताय इत्येव मन्तव्यम्' इति अचिन्तयत् सा। श्रीकरस्य चातुर्यं मनसि एव श्लाघितं तया।

## शीतलजलस्तोकः

**मूललेखकः – गिजुभाई बधेका, अनुवादः – रागिणी गोवाडिया**

एकः ग्रामः। ग्रामे एका वृद्धा वसति। न तस्याः बान्धवाः न सन्ततिः। पूर्णतया एकाकिनी। शान्त्या सुखेन च निवसति।

एकस्मिन् दिने वृष्टिः वर्षति। महती वृष्टिः। माघमासस्य वर्षा। कुवेलायाः वर्षा। न तस्याः वर्णनं सरलम्। नद्यः जलेन परिपूर्णाः। तडागाः जलेन आप्लाविताः। वनेषु अपि जलं व्याप्तम्। अविरततया आकाशात् जलपातनम्। कृष्णं गगनं, मेघैः आच्छादितम्।

तदा एकः व्याघ्रः मार्गात् परिभ्रष्टः जातः। सः अटन् अटन् वनात् ग्रामं प्रविष्टवान्।

ग्रामम् आगत्य वृद्धायाः गृहसमीपं स्थितवान्। वराकी वृद्धा गृहस्य उदस्तात् उपविश्य प्रकृतेः भीषणं रूपं पश्यति स्म। शनैः शनैः असूयया सा उक्तवती। "अहो! कस्मात् अपि न बिभेमि, किन्तु अस्मात् शीतलात् जलस्तोकात् बिभेमि।" सा दृष्टवती यत् व्याघ्रः अधः तिष्ठति इति।

सा उच्चैः वदन्ती विस्तृतवर्णनं करोति। 'अहं तु कस्मात् अपि न बिभेमि। व्याघ्रात् न बिभेमि, सिहात् न बिभेमि केवलम् अस्मात् शीतलजलस्तोकात् बिभेमि। अहं तु कस्मात् अपि न बिभेमि।' व्याघ्रः यत्र स्थितः आसीत् तस्य उपरि गृहस्य वातायनम् आसीत्। ततः शीतलजलबिन्दुपातः भवति स्म। तस्य मस्तके अपि जल बिन्दवः अपतन्।

शितलजलस्तोकपातनेन शैत्येन च व्याघ्रः कम्पते। सः चिन्तयति यत् एषा वृद्धा दृढा निर्भया च दृश्यते। कस्मात् अपि एषा न बिभेति; किन्तु शीतलजलस्तोकात् बिभेति। मम उपरि यः पतति सः एव शीतलस्तोकः स्यात्। अहं कम्पे भयं च अनुभवामि। हे प्रभो! मां पाहि!

अहं तु शीघ्रमेव इतः पलायनं करोमि। इत्थं सः व्याघ्रः भयात् ततः पलायनं कृतवान्।

वृद्धा तं दृष्ट्वा प्रसन्ना भूत्वा करताडनं कृतवती हसितवती उक्तवती च। भोः व्याघ्र! धाव धाव शीघ्रं कुरु। शीतलजलस्तोकः तव पृष्ठे अस्ति। एवं वृद्धा व्याघ्रात् मुक्ता जाता। सुखेन सा जीवनयापनं कुर्वती जनसेवायां लग्ना जाता। बालकान् अपि एतां कथां पुनः पुनः श्रावितवती सा वृद्धा।

## इदानीम्

ओजसी

**कूर्दनं सम्पन्नम्। तरणस्य चिन्ता नास्ति। कार्यं कर्तव्यम्। कर्तृत्वस्य चिन्ता नास्ति। जदत् विस्मरति सर्वकृतं हि अचिरम् जगदीश्वरप्राप्त्यर्थम् जगतः चिन्ता नास्ति।**

अस्माकं साम्प्रतसंस्कृत्यां बहु अल्पजनाः स्युः ये जीवने स्वस्य वृत्तिविषयस्य (profession), वा कार्यक्षेत्रस्य विषये परिवर्तनं कर्तुं सज्जाः भवन्ति। समाजे परिस्थितयः अपि प्रायशः तादृश्यः एव वर्तन्ते येन इदृशं परिवर्तनं नाम एकं बृहत् साहसं भवति। बहुवारं तु, यथा नदीतटे स्थितस्य किङ्कर्तव्यविचाराधीनस्य कृते, तरणस्य अपेक्षया कूर्दनं कठिनतरं भवति, तथैव जीवने अपि अनुभूयते। तथापि ये साहसं कुर्वन्ति वा कर्तुम् अवसरं प्राप्नुवन्ति ते न केवलं भाग्यशालिनः अपि तु जीवनवीराः।

ईदृशानां वीराणाम् एका विशेषा मानसिकता अस्ति। सा अत्र अवधातव्या; न तु तैः प्राप्तं वा अप्राप्तं भौतिकयशः। एते जनाः स्वस्मिन् स्थिते ईश्वरे वा शक्त्यां यथा विश्वसन्ति, तथैव ते जगति स्थिते भगवति अपि विश्वसन्ति। एते जनाः कर्तृत्वे निश्चिन्ततया निष्ठां स्थापयन्ति; न कस्मिंश्चित् सङ्कुचितकार्ये वा वृत्तिविषये वा कार्यफले। एतेजनाः जानन्ति यत् जगत् मत्केन्द्रितं नास्ति; न तथा च तत् चलति। अतः परिवर्तनसमये जगत् पीडयेत् चेदपि एते तस्मात् न बिभ्यति। इत्थं, एते स्वजीवने कृतकृत्यताम् आप्नुवन्ति। निजजीवनानुभवोद्भूता, एषा एव सा मानसिकस्थितिः।

## शरणम्

केचन जनाः संस्कृतं प्रति प्रतिकूलाः किमर्थं सन्ति? ते भेदं कर्तुं न जानन्ति यत् भाषायाः केवलं ''भाषा''एव एकं रूपम् अस्ति। तस्य रूपस्य विविधाः अभिव्यक्तयः इत्युक्ते साहित्यं, साहित्यात् समाजे आगताः विचाराः, संस्कृतिः, संस्कृतिवैविध्यं, विचारसंस्कृतिनां जीवने परिणामाः तान् अनुसृत्य जीवन्तः विविधाः जनाः इत्यादयः। कोऽपि जनः अन्यस्य संस्कृतप्रभावितजीवनशैल्याः विरोधी भवितुं शक्नोति। भवतु सः तथा। परन्तु तेन विरोधेन साकं सः न केवलं संस्कृतजनस्य, अपि तु संस्कृतस्य विरोधी किमर्थं भवति? कारणं सः न जानाति यत् – भाषा नाम किमपि ''स्वायत्तम्''रूपं वर्तते। एतत् रूपं तस्याः अभिव्यक्तिभ्यः भिन्नत्वेन तिष्ठति। विरोधः, विवादः, कलहः, द्वेषः इत्यादिकं परस्पर-जनेषु, विचारेषु, संस्कृतिषु भवितुं शक्नोति; परन्तु यः स्वस्य अन्तर्मनसा सह प्रामाणिकः भवितुं जानाति, सः कस्याश्चित् अपि ''भाषायाः'' विरोधी वा द्रोही वा प्रतिकूलः वा भवितुं नैव शक्नोति।

(एतस्मात् विचारात् स्फुरिताः एताः पङ्क्तयः।)

**॥ शरणम् ॥**

अन्तर्मनसः प्रामाणिकता
भाषामाता अद्रोहार्हा।
मृदूला सुखदा सङ्गीतात्मा
भाषामाता अमृतधारा॥

बुद्धिदीपिका बाग्विलसिका
भाषामाता नित्यसजीवा।
तत्त्वसूचिका जीववाहिका
भाषामाता अध्यात्मिकता॥

एका एव अद्वितीया
भाषामाता साधनरूपा।
श्रीचरणाभ्याम् अलङ्कारिका
भाषामाता सदैव सेव्या॥

## मासवार्ता

### संस्कृत-साहित्य-रसास्वाद-व्याख्यानमाला




संस्कृत-साहित्य-अकादमी, गान्धिनगरम् एवं च संस्कृतविद्याप्रतिष्ठानम्, अहमदाबाद इत्यनयोः संयुक्तोपक्रमेण आरब्धायाः संस्कृत-साहित्य-रसास्वाद-व्याख्यानमालायाः चतुर्थं व्याख्यानं डिसेम्बरमासस्य १४ दिनाङ्के शनिवासरे 'अमदावाद-मेनेजमेन्ट-एसोशिएशन' इति स्थाने सम्पन्नम् । कार्यक्रमेऽस्मिन् डॉ. महेशः चम्पकलालः (प्राध्यापकः, एम.एस.युनि. बरोडा, नाट्यविभागः) ''भासस्य 'महाभारतम्'प्रतमध्ये प्रयोगे च'' इति विषये डॉ. ललितः पटेलः (प्राध्यापकः, एस.पी.युनि. वल्लभविद्यानगरम्) ''भावकः तस्य दृष्ट्या च कालिदासः'' इति विषये सुन्दरं व्याख्यानम् अकुरुताम् । उभयोः वक्त्रोः व्याख्यानं श्रुत्वा संस्कृतरसिकाः प्रसन्नाः आसन् । अत्र उल्लेखनीयं यत् प्रतिमासम् एकवारम् एतस्याः व्याख्यानमालायाः आयोजनं भविष्यति । अग्रिमं व्याख्यानं जनवरीमासस्य २५ दिनाङ्के वर्तते ।

### आरब्धः वेदपाठः

एकलव्य-संस्कृत-एकेडेमीसंस्थाने शुक्लयजुर्वेदस्य मन्त्राणाम् उच्चारणस्य कश्चन अभ्यासक्रमः जनवरीमासस्य १ दिनाङ्कात् आरब्धः वर्तते । संस्कृतभाषायाः अध्येतारः संस्कृते निहितानां शास्त्राणाम् अपि अध्ययनं कर्तुम् इच्छन्ति । संस्कृतरसिकानां जिज्ञासाम् इच्छां च विज्ञाय संस्थानेन अभ्यासक्रमोऽयं आरब्धः वर्तते । श्रीऋषि-पुरोहितस्य मार्गदर्शने छात्राः अभ्यासक्रमेऽस्मिन् वेदमन्त्राणाम् उच्चारणस्य गानस्य च अध्ययनं करिष्यन्ति ।

## अहो चातुर्यम्

**- संस्कृतविकिपिडीयाजालस्थानात्**

**नपुंसकमिति ज्ञात्वा प्रियायै प्रेषितं मनः । तत्तु तत्रैव रमते हताः पाणिनिना वयम् ॥**

कश्चन अचिन्तयत् - 'मनः (मनश्शब्दः) नपुंसकम् । तत् प्रियायाः समीपं प्रेष्यते चेत् न काऽपि हानिः' इति । अतः प्रियायाः समीपं मनः प्रेषितवान् सः । किन्तु तत् मनः तत्रैव रममाणम् अतिष्ठत् ।

अतः सः विषादेन वदति - 'मनश्शब्दं नपुंसकलिङ्गं कुर्वता पाणिनिना वयं हताः' इति ।

'मनश्शब्दः' नपुंसकः अस्ति चेत् 'मनः' अपि नपुंसकं स्यादिति नास्ति नियमः । एतत् अजानता तेन कष्टम् अनुभूतं यत् तदर्थं तस्मै विषीदामः वयम् ।

## कृपया हसन्तु

हस्ताभ्यां चलित्वा आगच्छन्तं पुत्रं दृष्ट्वा पिता कोपं कुर्वन् उच्चैः अवदत् - "भोः मूर्ख ! एतत् किं करोषि त्वम् ? " "भवतः इच्छायाः एव पालनं करोमि" इति अवदत् पुत्रः ।

"मम का इच्छा ?" इति कुप्यन् पिता पुनः अपृच्छत् ।

"यदि अहं परीक्षायाम् अनुत्तीर्णः भवेयम् तर्हि गृहे पादं स्थापयितुम् अनुमतिं न दास्यामि" इति भवान् उक्तवान् आसीत् खलु । अतः अहं हस्ताभ्यां प्रवेशम् अकरवम् ।

★ ★ ★ ★ ★

एकस्मिन् दिने कश्चन भिक्षुकः भिक्षायां किमपि न प्राप्तवान् । सः ईश्वरं प्रार्थयन् अवदत् - "भोः प्रभो ! यदि अद्य अहं भिक्षायां दशरूप्यकाणि प्राप्नुयां तर्हि तस्मात् पञ्चरूप्यकाणि भवतः ।"

ततः सः यदा किञ्चित् अग्रे अगच्छत् तदा पञ्चरूप्यकाणि प्राप्तवान् । तानि प्राप्य सः अवदत् - "भोः भगवन् ! मयि तावानपि विश्वासः नास्ति ? पञ्चरूप्यकाणि पूर्वमेव स्व्यकरोत् भवान् ?"

★ ★ ★ ★ ★

महिला - (आपणिकं प्रति) पलाण्डोः मूल्यं किम् ?

आपणिकः - किलोपरिमितस्य शतं रूप्यकाणि ।

महिला - किन्तु अन्यः आपणिकः तु पञ्चाशतरूप्यकैः किलोपरिमितं प्रयच्छति ।

आपणिकः - तर्हि ततः एव स्वीकरोतु कृपया ।

महिला - किन्तु तस्य समीपे नास्ति सम्प्रति ।

आपणिकः - यदा मम समीपे पलाण्डुः न भवति तदा अहम् अपि दशरूप्यकैः किलोपरिमितं प्रयच्छामि ।

## अहो चातुर्यम्

– संस्कृतविकिपिडीयाजालस्थानात्

**काचं मणिं काञ्चनमेकसूत्रे ग्रन्थातु बाला किमिहात्र चित्रम् ।**
**अशेषवित् पाणिनिरेकसूत्रे श्वानं युवानं मघवानमूचे ॥**

कदाचित् काचित् बालिका काञ्चनमणिभिः हारं रचयन्ती आसीत् । मध्ये मध्ये तया काचमणयः अपि योजिताः आसन् । सुवर्णमणिभिः सह स्थिताः काचमणयः अपि सुवर्णमणिवत् भासन्ते इत्यतः तया भ्रान्त्या एवं कृतम् आसीत् । एतत् दृष्ट्वा कश्चित् तस्याः अविवेकिताम् अनिन्दत् । तदा अपरः अवदत् – 'काचमणीन् काञ्चनमणीन् च एकसूत्रतया योजयित्वा एषा हारं रचितवती इत्येतत् न महते अपराधाय । यतः एषा तु अल्पवयस्का बाला । किन्तु आश्चर्यं नाम सर्वं जानन् पाणिनिः एव श्वानं, युवकम्, इन्द्रं च एकसूत्रतया योजितवान् अस्ति' इति ।

(पाणिनिः 'श्वयुवमघोनाम्...' इति व्याकरणसूत्रं रचयन् स्वसूत्रे शुनकं, युवकम्, इन्द्रं च एकत्रैव निवेशितवान् अस्ति ।)

## ज्ञानसरिता

**सस्यानाम् आत्मरक्षणक्रमः** – द्रव्येषु सचेतनानि अचेतनानि चेति विज्ञानपुस्तकेषु द्वैविध्यं कल्प्यते । सस्यानि सचेतनेषु अन्तर्भवन्ति इति वयं जानीमः एव । प्रसिद्धः सस्यशास्त्रज्ञः जगदीशचन्द्रबोसवर्यः सप्रमाणं निरूपितवान् अस्ति यत् सस्यानि अपि परिसरानुगुणं स्पन्दन्ते इति ।

एषु दिनेषु क्योटोविश्वविद्यालयस्य विज्ञानिनः अपरम् अंशं प्रमाणीकृतवन्तः सन्ति । स च सस्यानि परस्परं 'भाषन्ते' इति । यदा विपत्तिः उपस्थिता भवति तदा समीपस्थाय सस्याय तैः सन्देशः प्रेष्यते । एतत् सन्देशप्रेषणं विविधैः प्रकारैः सम्भवति । कानिचन सस्यानि रासायनिकसद्रव्यद्वारा सन्देशं प्रेषयन्ति । एतं प्राप्नुवन्ति तत्परिसरस्थानि अन्यानि सस्यानि अवगच्छन्ति यत् अस्माभिः रक्षणोपायः चिन्तनीयः इति । विषांशोत्पादनद्वारा कण्टकादिद्वारा च सस्यानि आत्मरक्षणं चिन्तयन्ति ।

**टेरेण्टुलानामकः ऊर्णनाभः** – 'टेरेण्टेल्लानृत्य' विषये किं भवद्भिः किमपि श्रुतम् ? एतत् इटलिदेशीयं जानपदं नृत्यम् । मध्ययुगे आसीत् एतत् । 'टेरेण्टुला' नामकस्य महाकारकस्य केशमयस्य ऊर्णनाभस्य नाम्नः सम्बन्धात् एतस्य नृत्यस्य तादृशं नाम । तेन ऊर्णनाभेन दष्टः पुरुषः वेदनया यादृशानि पदानि स्थापयति तादृशानि एव आदिमानि कानिचन पदनिक्षेपणानि भवन्ति एतस्मिन् नृत्ये अपि ।

दक्षिणयुरोपीयाः ऊर्णनाभाः घोरविषमयाः भवन्ति प्रायः । तैः दष्टः जनः 'टेरेण्टिस्म्' – नामकम् अस्वास्थ्यं प्राप्नोति । नितरां दुर्बलतां गतः सः जीवरहितः इव भवति । प्राचीने काले एतस्य चिकित्सा आसीत् सङ्गीतश्रावणमात्रम् । तत् सङ्गीतं शृण्वन् सः ऊर्णनाभेन दष्टः जनः नृत्यन् एव शक्तिह्रासकारणतः मरणम् आसादयति स्म ।

किन्तु अद्य टेरेण्टुलादंशनतः लघुपशवः अन्ये कीटादयः च मरणं प्राप्तुम् अर्हन्ति, न तु मानवः कोऽपि ।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **समुदयः** | उदय होना | rising up |
| **समुदाचारः** | उचित व्यवहार | proper behaviour |
| **समुदित** | उपर उठा हुआ | gone up |
| **समुद्वाहः** | ढोना | carrying |
| **समुल्लाहः** | अत्यन्त हर्ष | great pleasure |
| **समूहः** | झुण्ड | multitude |
| **सम्परायः** | संघर्ष | conflict |
| **सम्पर्कः** | मिलाप | mixture |
| **सम्पातः** | मिलकर गिरना | falling together |
| **सम्पादनम्** | बनाना | making |
| **सम्पुटः** | डिब्बा | a casket |
| **सम्पृक्तः** | मिला हुआ | mixed |
| **सम्प्रति** | इस समय | Now |
| **सम्प्रतिपत्तिः** | प्राप्तिः | gain |
| **सम्प्रदानम्** | पूर्णरूप से दे देना | giving completely |

## किं भवन्तः जानन्ति ?

१ ) **सिद्धान्तशिरोमणिनामकः ज्योतिषग्रन्थः केन रचितः वर्तते ?**

(क) आर्यभटेन (ख) ब्रह्मगुप्तेन (ग) भास्कराचार्येण (घ) वराहमिहिरेण

२ ) **'ब्रह्मस्फुटसिद्धान्तः' 'खण्डखाद्यकः' इत्येतौ ग्रन्थौ केन रचितौ ?**

(क) वराहमिहिरेण (ख) आर्यभटेन (ग) भास्कराचार्येण (घ) ब्रह्मगुप्तेन

३ ) **एतेषु कः ग्रन्थः ज्योतिषाचार्येण आर्यभटेन लिखितः अस्ति ?**

(क) ब्रह्मस्फुटसिद्धान्तः (ख) आर्यभटीयः (ग) सिद्धान्तशिरोमणिः (घ) पञ्चसिद्धान्तिका

४ ) **श्रीधराचार्यः महावीरः श्रीपतिः ब्रह्मगुप्त च कस्य शास्त्रस्य आचार्याः आसन् ?**

(क) खगोल (ख) ज्योतिष (ग) गणित (घ) दर्शन

५ ) **'विनयपत्रिका' 'जानकीमङ्गल' 'रामलला नहछू' 'बरवै रामायण' 'वैराग्य संदीपनी' 'कृष्ण गीतावली' इत्येताः कस्य कृतयः सन्ति ?**

(क) सूरदासस्य (ख) तुलसीदासस्य (ग) कबीरदासस्य (घ) रसखानस्य

६ ) **प्रसिद्धस्य ग्रन्थस्य सुदामाचरितस्य रचयिता कः अस्ति ?**

(क) गिरिधरदासः (ख) नरोत्तमदासः (ग) तुलसीदासः (ग) सूरदासः

उत्तराणि – (१) ग (२) घ (३) ख (४) ग (५) ख (६) ख

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## संस्कृत-सम्भाषण-वर्गः

(प्रथमः स्तरः)

**Date :** 02/03/20 to 29/05/20
**Day :** Mon-Wed-Fri
**Time :** 6:30 pm to 8:00 pm
**Fees :** 4000/-

- **Venue :** Eklavya Sanskrit Academy
Core House, Nr Parimal Garden,
Ellisbridge Ahmedabad

- **Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## Admission Open

**Value Education**
**Through Sanskrit**

## बालसंस्कारकेन्द्रम्

**(Class SKg to 4)**

## बालसंस्कृतवर्गः

**(Class 5 to 8)**

**Date :** 13/06/20 to 10/04/21
**Day :** Saturday
**Time :** 5.30pm to 7.00pm
**Fees :** 5000/-

- **Venue :** Eklavya Sanskrit Academy
Core House, , Nr Parimal Garden,
Ellisbridge Ahmedabad

- **Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

### संस्कृत-साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006